उद्+ऊर्द्ध्वगतौ ऊर्द्ध्वप्रकाशे च। उत्काशते उत्काशः।
नि+तुल्यत्वे नीकाशः घञि पूर्वस्वरदीर्घः। [४६अ०।
सम्+नि+निष्काशने। "न सन्निकाशयेद्धर्म्मम्" भा०आश्व०
निर्+निःसारणे। "मात्रा निष्काशयेदेषा पुनः सन्धान-काङ्क्षया" सा०द०। अत्र निःक्रमोद्रूपत्वेन निष्कासयेदित्येव पाठोयुक्तः
प्र०+ प्रकृष्टदीप्तौ "एषु सर्व्वेषु भूतेषु गूढोत्मा न प्रकाशते" कठो०। "उभावपि प्रकाशेते प्रहृष्टौ वृषभाविव" भा०वि० ७५५श्लो०।
प्रति+प्रतिरूपप्रकाशे सारूप्ये च प्रतीकाशः। "यमस्य त्वा गृहेऽरसं प्रतिचाकशान" अथ० ६,२९,२,
वि+ मुकुलीभावापनोदनेन प्रकाशे। पुष्पं विकाशते। प्रकाशे च। "आदित्य इव तं देशं कृत्स्नं सर्व्वं व्यप्रकाशयत्" भा० आ० ७४५६श्लो० वीकाशः।
सम्+ सम्यक्प्रकाशे सादृश्येन प्रकाशे च सङ्काशः "प्रतिस्रोतस्तृणाग्राणां सहस्रं सञ्चकाशिरे" रामा०

**काश**—दीप्तौ दिवा०आ०अक०सेट्। काश्यते अकाशिष्ट काशाम्-बभूव आस चक्रे चकाशे ऋदित् णिच् अचकाशत् त

**काश** पु०केन जलेन कफात्मकेन अश्यते व्याप्यतेऽत्र अश—व्याप्तौ आधारे घञ्। १काशरोगे, भरतः। कासशब्दे विवृतिः "काशाम्बुलालाविलः" शान्तिश०२वृते (हाँचि) शब्दर०। तयोः जलेनाकीर्ण्यत्वात्तथात्वम्। काश दीप्तौ अच्। (केशिया) २तृणभेदे "केशः काशस्तवकविकाशः" सा०द० "आकर्ण्यमुल्लसितमञ्जु विकाशिकाशनीकाशमाप समतां सितचामरस्य" माघः "कैलासकाशनीकाशमूर्त्त्या" दशकु० "काशः स्यान्मधुरस्तिक्तः स्वादुपाकोहिमः सरः। मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तजरोगहृत्" भावप्र० तद्गुणाद्युक्तम् तत्पुष्पे न०। ईषदश्नाति अश—अच् कोः का। ४मूषिकभेदे पुंस्त्री स्त्रियां ङीष्। "भूम्या आखून् आलभेत" इत्युपक्रमे "काशान् दिग्भ्यः" यजु०२४,२५, "काशान् मूषिकभेदान्" वेददी०। ५ऋषिभेदे पु० काशस्य गोत्रापत्यम् अश्वा० फञ्। काशायन तद्गोत्रापत्ये पुंस्त्री

**काशक** पु० काश—ण्वुल्। १काशतृणे शब्दरत्ना०२सुहोत्रस्य पुत्रभेदे "सुहोत्रस्य सुतद्वयम्। काशकश्च महासत्वस्तथा-गृत्समतिर्नृपः" हरिवं०३२अ०। अस्यैव काशिरित्यपि नाम तत्रैव "काशेस्तु काशयोराजन्!" इति तदनन्तरोक्तेः काशेन निर्वृत्तादि काशा० चतुरर्थ्याम् इल। काशिल काशनिर्वृत्तादौ त्रि० काशे भवः उत्करा० छ। काशीय काशभवादौ त्रि०। ३प्रकाशान्विते त्रि०

**काशकृत्स्न** पु० आदिशाब्दिके ऋषिभेदे "इन्द्रश्चन्द्रः काशकृत्स्नापिशिलिशाकटायनाः पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः" वोपदेवः। "अवस्थितेरिति काशकृत्स्नः" शा०सू०। काशकृत्स्नेन निर्वृत्तादि अरीहणा० चतुरर्थ्यां वुञ्। काशकृत्स्नक तन्निर्वृत्तादौ त्रि०

**काशज** त्रि० काशे जायते जन०ड ७त०। काशजाते "दीर्घ काशतुषभ्राष्ट्रवटं जे" पा०तस्य आद्युदात्तता

**काशपरी** स्त्री काशः परोयस्याःगौरा०ङीष्। काशाहृतनद्याम् तत्र भवः नद्या० ढक्। काशपरेय तन्नदीभवे त्रि० पृषो० पस्य फः। काशफरीत्यपि तत्रैव नद्यादि गणे तस्य पाठात् भवार्थे ढक्। काशफरेय तद्भवे त्रि०

**काशपौण्ड्र** पु० काशप्रधानः पौण्ड्रः। देशभेदे "कोशलाः काशपौण्ड्राश्च कालिङ्गा मागधास्तथा" भा० क० ४५अ०

**काशमय** त्रि० काशेन प्रचुरः तद्विकारोवा प्राचुर्य्ये तद्विकारे वा मयट्। १काशप्रचुरे २तन्निर्मिते च "कुशकाशमयं बर्हिरास्तीर्य्य भगवान्मनुः" भाग०३,२,२, श्लो०। स्त्रियां ङीप्।

**काशमर्द्द** पु० काशं मृद्नाति मृद—अण् उप०स०। (कालकासेन्दा) वृक्षे रायमुकुटः [२२अ०।

**काशय** पु० काशिन्दपपुत्रे "काशेस्तु काशयोराजन्" हरिवं०

**काशादि** पु० पाणिन्युक्ते चतुरर्थ्यामिलप्रत्ययनिमित्ते शब्दगणे स च गणः "काश पाश, अश्वत्थ पलाश, पीयूक्षा चरण वास नड़, वन, कर्द्दम, कच्छूल, कङ्कटगुहा, विस, तृण, कर्पूर, वर्व्वर, मधुर, ग्रह, कपित्थ, जतु, सीपाल" [ न्मलिवृक्षे जटाधरः

**काशाम्मलि** स्त्री कुत्सिता शाल्मलिः कोः का। कूटशा-

**काशि** स्त्री काश—इन्। १काशग्राम् वा ङीप् काशीत्यपि-तत्र काशीशब्दे विवृतिः "आःकाशिवासिजनता ननु वञ्चिताऽभूत्" काशीख०। २काशीनगरोपलक्षिते देशभेदे पु० भूम्नि। "अतः काशयोऽग्नीनादत्त" "यत्त काशीनां भरतः सात्वतामिव" शत०ब्रा० ३,५,४,१९, २१। "काशिष्वपि नृपो राजन् दिवोदासपितामहः" हर्य्यश्व इति विख्यातः" भा० आनु० ३०अ० "सौधामद्रभुजिङ्गाश्च काशयोऽपरकाशयः" भा०स० ९अ०। ३सूर्य्ये पु० उज्ज्वल०। ४मुष्टौ निरु०६।"१आपइव काशिना संगृभीताः" ऋ० ७,१०४,८,"काशिना मुष्टिना" भा०। भावे इन् ५प्रकाशे च "अपारे यत् संगृभ्णा मघवन्! काशिरित्ते" ऋ० ३,३०'५"काशिरित् लोके प्रसिद्धएव यद्वा काशिर्मुष्टिः" भा०